# Guggulu

**जायन्ते पुरपादपा मरुभुवि ग्रीष्मेऽर्कसन्तापिताः ।**
**शीततौं शिशिरेऽपि गुग्गुलुरसं मुञ्जन्ति ते पञ्चधा ।।**
**हेमाभं महिषाक्षतुल्यमपरं सत्पद्मरागोपमम् ।**
**भृङ्गाभं कुमुदद्युती च विधिना ग्राह्यापरीक्ष्याथ ते ।। (Rjn)**

The trunk of the Guggulu tree is slashed in summer by which the gum exudates due to heat. This gets solidified in the winter season. This is how Guggulu is extracted. It is of five types: Hemabha, Mahishaksatulya, Padmaragopama, Bhrungabha, Kumudadyu.

**वह्नौ ज्वलन्ति तपने विलयं प्रयान्ति ।**
**क्लिद्यन्ति कोष्णसलिले पयसा समानाः ।।**
**ग्राह्याः शुभाः परिहरेच्चिरकालजातान् ।**
**अङ्गारवर्ण समपूयविगन्धवर्णान् ।। (Prayogamruthaha)**

On exposure to tapa it shines like vahni, that which is vilaya (liquid), klidya (wet), kosna (warm), salila (flows), payasa samana (similar to milk), grahya is subha, which loses its properties once it becomes old is angara varna and is samapuya vigandha (smells foetid) and looks discoloured.

**गुल्गुलु रिण्डी नचणः पलंकषा कौशिको जटायुश्च ।**
**सहिकश्च वायसारिः शिवप्रियो धूपिकः पुरो दुर्गः ।।**
**महिषाक्षाऽर्णक्रमो भद्रश्रियं च कालरसः ।**
**नकुञ्चरः शिलाख्यः कथ्यते महाधूपः ।। (Aa ma)**

Guggulu, Rindi, Nacana, Palangkasa, Kausika, Jatayu, Sahika, Vayasari, Sivapriya, Dhupika, Pura, Durga, Mahisaksa, Arnakrama, Bhadrasriya, Kalarasa, Nakuncara, Silakhya, Mahadhupa are the synonyms for Guggulu.

**गुग्गुलुर्देवधूपश्च जटायुः कौशिकः पुरः ।**
**कुम्भोलूखलकं क्लीबे महिषाक्षः पलंकषः ॥**

**महिषाक्षो महानीलः कुमुदः पद्म हत्यपि ।**
**हिरण्यः पञ्चमो ज्ञेयो गुग्गुलो पञ्चजातयः ॥**

**भृङ्गाञ्जनसवर्णस्तु महिषाक्ष इति स्मृतः ।**

**महानीलस्तु विज्ञेयः स्वनामसमलक्षणः ॥**

**कुमुदः कुमुदाभिः स्यात् पद्मो माणिक्यसन्निभः ।**

**हिरण्याख्यास्तु हेमाभः पञ्चानां लिङ्गमीरितम् ॥**

**महिषाक्षो महानीलो गजेन्द्राणां हितावुभौ ।**

**हयानां कुमुदः पद्मः स्वस्थ्यारोग्यकरौ परौ ॥**

**विशेषेण मनुष्याणां कनकः परिकीर्तितः ।**
**कदाचिन्महिषाक्षश्च मतः कैश्चन्नृणांमपि ॥ (Bpn)**

Guggulu, Devadhupa, Jatayu, Kausika, Pura, Kumbholukhalaka, Kliba, Mahisaksa, Palnkasa are the synonyms for Guggulu.

Mahisaksa, Mahanila, Kumuda, Padma, Hiranya are the five types of Guggulu.

Mahisaksa is similar to bhrngaraja or anjana in colour.
Mahanila is similar in colour as its name indicates.
Kumuda type is similar to kumuda puspa in colour.
Padma type is similar to manikya in colour.
Hiranya is similar to hema in colour.

Mahisaksa and Mahanila types are used to cure diseases in elephants.
Kumuda and Padma types are used to treat horses.
Kanaka type other wise called Hiranya is specifically used to treat people.
According to some Mahisaksa is used to treat people.

**गुग्गुलुः विशदस्तिक्तो वीर्योष्णः पित्तलः सरः ।**
**कषायः कटुकः पाके कटु रूक्षो लघुः परः ।।**
**भग्नसन्धानकृत् वृष्यः सूक्ष्मस्वर्यो रसायनः ।**
**दीपनः पिच्छिलो बल्यः कफवातव्रणापचीः ।।**
**मेदो मेहाश्मवातांश्च क्लेदकुष्ठाममारुतान् ।**
**पिण्डिकाग्रन्थिशोफार्शोगण्डमालाकृमीञ्जयेत् ।।**

**माधुर्याच्छमयेद्वातं कषायत्वाच्च पित्तहा ।**
**तिक्तत्वात्कफजित्तेन गुग्गुलुः सर्वदोषहा ।।**

**स नवो बृंहणो वृष्यः पुराणस्वतिलेखनः ।**
**स्निग्धः काञ्चनसङ्काशः पक्वजंबूफलोपमः ।।**
**नूतनो गुग्गुलुः प्रोक्तः सुगन्धिर्यस्तु पिच्छिलः ।**

शुष्को दुर्गन्धकश्चैव त्यक्त प्रकृतिवर्णकः ||
पुराणः स तु विज्ञेयो गुग्गुलुर्वीर्यवर्जितः |

अम्लं तीक्ष्णमजीर्णं च व्यवायं भ्रममातपम् ||
मद्यं रोषं त्यजेत्सम्यग्गुणार्थी पुरसेवकः | **(Bpn)**

Guggulu is tikta, kashaya, katuka in taste, visada, sara , ruksa, laghu in property, usna in potency, katu in paka, increases pitta, cures kapha, vata, vrsya, suksma, svarya, dipana, balya, bhagnasandhana karaka, rasayana, vrana, apaci, meda, meha, asma, vata, kleda, kustha, maruta, pindika, granthi, sopha, arsa, gandamala, krmi.

Due to its madhura taste, it reduces vata; kashaya it reduces pitta; tikta it reduces kapha and hence it is sarva dosha hara.

Nava guggulu is brmhana, vrsya. Purana guggulu is ati lekhanam. Hava guggulu is snigdha, kancana sankasa, pakva jambu phala sama, sugandhaha, picchila.

That which is suska, durgandha, and is devoid of prakrta varna is purana guggulu and is virya varjana.

Person desirous to take guggulu should avoid amla rasa, tiksna-ajirna padarthas, vyavaya, bhrama, atapa. madya, rosha in order to gain its full effects.

गुग्गुलुः कटुतिक्तोष्णः कफमारुतकासजित् |
कृमिवातोदरप्लीहशोफार्शोघ्नो रसायनः || **(Rjn)**

Guggulu is katu, tikta in taste, usna in potency, alleviates kapha maruta, cures kasa, krmi, vatodara, pliha, sopha, arsa and is rasayana.

सुगन्धिः सुलघुः सूक्ष्मस्तिक्ष्णोष्णः कटुको रसः ।
कटुपाकः सरो हृद्यो गुग्गुलुः स्निग्धपिच्छिलः ॥

स नवो बृंहणो वृष्यः पुराणस्त्वतिलेखनः ।
तैक्ष्णयौष्णयात् कफवातघ्नः सरत्वान्मलपित्तनुत् ॥
सौगन्ध्यात् पूतिकोष्ठघ्नः सौक्ष्म्याच्चानलदीपनः । (Su.S)

Guggulu is katuka in taste, tiksna, sara, hrdya, snigdha picchila, sugandhi, sulaghu, suksma in property, usna in potency, katu in paka.
Nava guggulu is brmhana, vrsya; Purana guggulu is ati lekhana, tiksna, sara in property, usna in potency, alleviates kapha and vata is mala pitta hara, sugandhya, puti kosthaghna, suksma and anala dipana.

स्वभावविशदाः स्निग्धाः स्वामोदा: कण्ठशोधनः ।

सर्वे समानवीर्यास्ते सर्वे रसगुणैः समाः ॥
आस्वादे तिक्तकटुका: कषायाः स्वादवः परम् ।

महिषाक्षो गजेन्द्रणां महानीलश्च शस्यते ।
वाजिनां कुमुदः पद्मो नराणां कनकः स्मृतः ॥
(कदाचिन्महिषाक्षस्तु मतः कैञ्चिन्नृणामपि ।)

स नवो बृंहणो वृष्यः पुराणस्त्वतिकर्षणः ।

माधुर्याच्छमयेद् वातं कषायत्वाच्च पित्तजित् ॥
तिक्तत्वाच्छलेष्महृच्चैवं गुग्गुलुः सर्वदोषहा ।

कृष्णः शोणितपित्ते च श्लेष्मपित्ते च पिङ्गलः ॥
वातपित्ते तथा श्वेतो गुग्गुलुः शस्यते तथा ।

गुग्गुलुर्मधुरस्तिक्तो कषायः कटुकः कटुः ॥
पाके रूक्षो लघुः सूक्ष्मः वीर्येणोष्णः सरस्तथाः ।
दीपनः कफवातघ्नो वृष्यः बल्यो रसायनः ॥
भग्नसन्धानकृत् स्वर्यो बृंहणो विनियच्छति ।
मेदोमेहाश्मवातास्रग्रन्थिगण्डव्रणापचीः ॥
पिडकाक्लेदशोफार्शोकण्डूकुष्ठवमिकृमीन् ।

तच्छाकं मधुरं रुक्षं कटुकं शिशिरं गुरु ॥
विष्टम्भि सृष्टविण्मूत्रं कफमारुतकोपनम् ॥ (Kdn)

By Svabhava it is Visada, Snigdha, Svamoda, Kantha sodhana.

All the types are similar in potency, taste and property. By taste they are tikta, katuka,  kashaya and madhura.

Out of the five varities Mahisaksha and Mahanila varities are used for elephants. Kumuda and Padma varieties are used for horses. Kanaka variety otherwise named Hiranya is specifically used in human.

Navina Guggulu is brmhana and vrsya. Purana Guggulu is ati karsana.

Due to madhura taste it pacifies vata; kashaya it pacifies pitta; tikta it pacifies kapha hence it alleviates all the three doshas.

Krsna varna Guggulu is used in Sonitapitta; Pingala varna Guggulu in Kapha pitta and Sveta varna Guggulu in Vata pitta.

Guggulu is kashaya, katuka, tikta, madhura in rasa, ruksa, laghu, suksma in property, usna in poteny, katu in paka, alleviates kapha vata, sara, dipana, vrsya, balya, rasayana, bhagnasandhana karaka, svarya, brmhana, It cures meda roga, meha, asma, vata asra, granthi, ganda, vrana, apaci, pidaka, kleda, sopha, kandu, kustha, vami and krmi.

Its saka is madhura, katuka in rasa, ruksa, guru in property, sisira in potency, vistambhi, srsta vin mutra, increases kapha and vata.